

मद्रपुरीसंस्कृतकलाशालायाः साहित्याध्यापकः श्रीमानुमापतिः, श्रुतिरामगुरुकुलाध्यापकः श्रीकामेश्वरघनपाठी, मद्रपुरीसंस्कृतकलाशालाया व्याकरणाध्यापकः श्रीबिल्वेश्वरः, वेदविज्ञानगुरुकुलस्य मीमांसाध्यापकः श्रीश्रुतिप्रियः, इत्येतेभ्यः महाविद्वद्भ्यः अस्य ग्रन्थस्य प्रकाशने साहाय्यकृद्भ्यः कृतज्ञतां समर्पयामः।

# पुरोवाक्

करामलकवद्येन भावार्थो दर्शितः श्रुतेः। श्रुत्यैव राघवप्रेम्णा तं श्रीरङ्गार्यमाश्रये॥

यद्वंश्यैर्द्राविडो वेदो व्याख्यातः कृष्णसूरिभिः।

व्याख्यायते श्रुतिः साक्षात्तद्वंश्यै रङ्गसूरिभिः॥

अधुना महात्मनां श्रीश्रीश्रीकृष्णप्रेमिस्वामिनां श्रीकुमारैः सुव्यासयोगविश्वविद्यालये प्राप्तयोगविद्यावारिधिपदैः रामवात्सल्यनिष्ठारूपिण्या साक्षाच्छबरीसमतपस्विन्या सिद्धया लक्ष्मीमात्रा वेदान्तपरया समन्वयाचार्य इति दत्तबिरुदाङ्कितैः योगश्रीरघुरामवर्यैः योगाराम इति दत्तबिरुदाङ्कितैः गोपपुरीमठाधीशैः रामकथामृतवर्षी इति दत्तबिरुदाङ्कितैः शृङ्गगिरिवासिभिः सामवेदप्रवीणैः श्रीराममूर्तिश्रौतिभी रामायणप्रवचनविराट् इति दत्तबिरुदाङ्कितैः श्रीरामानुभवमग्नैः श्रीरामसेवाधुरन्धरैः श्रीरामायणस्य पाठभेदान् संयग्विचार्य वाल्मीकिहृदयमिदमित्थमिति निर्णीतवद्भिः रामपादाब्जयोरनन्यशरणैः महापुरुषैरस्मदाचार्यैः श्रीरामकुटुम्बनिर्वाहकैः श्रीरङ्गनाथसुधीभिरस्मदुज्जीवनाय समग्रस्य ऋग्वेदस्य आध्यात्मिकं विस्तृतविविरणं कृतमित्यस्मद्भाग्यमेव।

ऋग्वेदः श्रौतकर्मानुष्ठानोपयोगी ग्रन्थ इति प्रसिद्धः। इमं दर्शयितुं बह्व्यो व्याख्याः सन्ति। अयमत्र न निराक्रियते। किन्तु इदं विवरणं योगाधारेण प्रणीतम्। कथमस्मदध्यात्मसाधने मन्त्रा मन्त्रविषयाश्चोपयोक्तव्या इति दर्शितम्। यद्यपि इतः पूर्वमेवं श्रीमध्वाचार्यैः तदनुसारिजयतीर्थादिभिः श्रीमदरविन्दपादैः तदनुसारिकपाल्यादिभिः रचितं तथापि इदानीमेव संस्कृतभाषायां प्रथमतया समग्रस्य ऋग्वेदस्य विवरणमेतादृशमाविर्भवति।

पूर्णोऽयं ग्रन्थः योगविषयः। उषसि कैवल्यप्राग्भारं यमे प्रत्याहारं रुद्रे संवेगं वरुणे ऋतम्भरसमाधिं हिरण्यगर्भे महत्तत्त्वमग्नौ सर्वभूतहितक्रतुं दर्शयतीति कारणेन योगिनामयं ग्रन्थः परमोपयोगी भवेत्। मोदप्रमोदादिशब्दानां वितर्कविचारादिसमाधिरूपेणार्थकल्पनं विलक्षणं सूक्ष्ममपि। सनातनधर्मस्थसर्वदर्शनाधारभूतं श्रुतिदर्शनमिति न केवलमत्युक्तिः किन्तु सत्योक्तिरेवेत्यस्य ग्रन्थस्य पारायणेन ज्ञायते। एतादृशं ग्रन्थं श्रद्धया गृह्णन्तो वयं सफला भवेम। सर्वेषु च वेदविद्यालयेषु अयं ग्रन्थः श्रुतिभावार्थज्ञानाय पाठ्यविषयो भवतु इति प्रार्थये। नमो महद्भ्यो गुरुभ्यः।

इति श्रीरङ्गनाथाचार्य- अन्तेवसायी

त्रिविक्रमः